श्रीगुरु स्तुतिः

# वन्दे गुरूणां चरणारविन्दे
# सन्दर्शित स्वात्म सुखावबोधे।
# जनस्य ये जाङ्गलिकायमाने
# संसार.हालाहल.मोहशान्त्यै।।

---

गुरुपरम्परा –

## सदाशिव.समारम्भां शङ्कराऽऽचार्यमध्यमाम्।
## अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।। 1।।

## नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरञ्च।
## व्यासं शुकं गौडपदं महान्तं
## गोविन्दयोगीन्द्र.मथाऽस्य शिष्यम्।। 2

## श्रीशाङ्कराचार्यमथाऽस्य पद्म-पादञ्च
## हस्तामलकञ्च शिष्यम्।

तं तोटकं वार्त्तिककारमन्या-नस्मद्गुरून्

सन्तत.मानतोऽस्मि॥

श्रुतिस्मृतिपुराणाना-मालयं करुणाऽऽलयम्।

नमामि भगवत्पादं शङ्करं लोकशङ्करम्॥ 4

शङ्करं शङ्कराऽऽचार्यं केशवं बादरायणम्।

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥ 5

दत्तात्रेयसमारम्भां नृसिंहादिकमध्यमाम्।

सच्चिदानन्दपर्यन्तां वन्दे गुरुपरम्पराम्।। 6

---

गुरुगीताग्रन्थोक्ताः श्लोकाः

संसारवृक्ष.मारूढाः पतन्तो नरकाऽर्णवे।

सर्वे येनोद्धृता लोका.स्तस्मै श्रीगुरवे नमः।। 42

गुरुर्ब्रह्मा गुरु.र्विष्णु र्गुरुर्देवो महेश्वरः।

गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः।। 43

अखण्ड.मण्डलाऽऽकारं व्याप्तं येन चराचरम्।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।। 44

देहे जीवत्व.मापन्नं चैतन्यं निष्कलं परम्।

त्वंपदं दर्शितं येन तस्मै श्रीगुरवे नमः।। 45

अखण्डं परमार्थं स-दैक्यं च त्वंतदो.ऽशुभम्।

असिना दर्शितं येन तस्मै श्रीगुरवे नमः।। 46

सर्वश्रुति.शिरोरत्न-नीराजित.पदाऽम्बुजम्।

वेदान्ताऽम्बुजसूर्याऽऽभं श्रीगुरुं शरणं व्रजेत्।। 47

चैतन्यं शाश्वतं शान्तं मायाऽतीतं निरञ्जनम्।

नादबिन्दु.कलाऽतीतं तस्मै श्रीगुरवे नमः।। 48

स्थावरं जगमं चेति यत्किञ्चि.ज्जगतीतले।

व्याप्तं यस्य चिता सर्वं तस्मै श्रीगुरवे नमः।। 49

त्वं पिता त्वं च मे माता त्वं बन्धु.स्त्वञ्च दैवतम्।

संसारप्रीति.भङ्गाय तुभ्यं श्रीगुरवे नमः।। 50

यत्सत्तया जगत्सत्त्वं यत् प्रकाशेन भायुतम्।

नन्दनं च यदानन्दात् तस्मै श्रीगुरवे नमः।। 51

येन चेतयताऽपूर्यं चित्तं चेतयते नरः।

जाग्रत्.स्वप्न.सुषुप्त्यादौ तस्मै श्रीगुरवे नमः।। 52

यस्य ज्ञाना.दिदं विश्व-मदृश्यं भेदभेदतः।

सत्स्वरूपाऽवशेषञ्च तस्मै श्रीगुरवे नमः।। 53

य एव कार्यरूपेण कारणेनाऽपि भाति च।

कार्यकारण निर्मुक्त-स्तस्मै श्रीगुरवे नमः।। 54

ज्ञानशक्ति.स्वरूपाय कामिताऽर्थ.प्रदायिने।

भुक्तिमुक्ति.प्रदात्रे च तस्मै श्रीगुरवे नमः।। 55

अनेक जन्मसंप्राप्त कर्मकोटि विदाहिने।

ज्ञानाऽनल.प्रभावेण तस्मै श्रीगुरवे नमः।। 56

न गुरो.रधिकं तत्त्वं न गुरो.रधिकं तपः।

न गुरो.रधिकं ज्ञानं तस्मै श्रीगुरवे नमः।। 57

मन्नाथ.श्श्रीजगन्नाथो मद्गुरु.स्त्रिजगद्गुरुः।

ममाऽऽत्मा सर्वभूताऽऽत्मा तस्मै श्रीगुरवे नमः।।

गुरु.रादि.रनादिश्च गुरुः परमदैवतम्।

गुरो.स्समानः को वाऽस्ति तस्मै श्रीगुरवे नमः।।

एक एव परो बन्धु-र्विषमे समुपस्थिते।

निस्स्पृहः करुणासिन्धु-स्तस्मै श्रीगुरवे नमः।। 60

गुरुमध्ये स्थितं विश्वं विश्वमध्ये स्थितो गुरुः।

विश्वरूपो विरूपोऽसौ तस्मै श्रीगुरवे नमः।। 61

भवाऽरण्यप्रविष्टस्य दिङ्मोह.भ्रान्त.चेतसः।

येन सन्दर्शितः पन्था-स्तस्मै श्रीगुरवे नमः।। 62

तापत्रयाऽग्नि.तप्तानां श्रान्तानां प्राणिना मुमे।

गुरुरेव परा गंगा तस्मै श्रीगुरवे नमः।। 63

हेतवे सर्वजगतां संसाराऽर्णव सेतवे।

प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः।। 64

ध्यानमूलं गुरो.र्मूर्तिः पूजामूलं गुरोः पदम्।

मन्त्रमूलं गुरो.र्वाक्यं मोक्षमूलं गुरोः कृपा।। 65

हरणं भवरोगस्य तरणं क्लेशवारिधेः।

भरणं सर्वलोकस्य शरणं चरणं गुरोः।। 66

शिवे रुष्टे गुरु.स्त्राता गुरौ रुष्टे न कश्चन ।

तस्मात् परगुरुं लब्ध्वा तमेव शरणं व्रजेत्।। 67

अत्रिनेत्र.श्शिव.स्साक्षात् द्विभुजश्चाऽपरो हरिः।

योऽचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये ।। 68

नित्याय निर्विकाराय निरवद्याय योगिने।

निष्कलाय निरीहाय शिवाय गुरवे नमः।। 69

शिष्यहृत्पद्म.सूर्याय सत्याय ज्ञानरूपिणे।

वेदान्तवाक्य.वेद्याय शिवाय गुरवे नमः।। 70

उपायोपेय.रूपाय सदुपाय.प्रदर्शिने।

अनिर्वाच्याय वाच्याय शिवाय गुरवे नमः।। 71

कार्यकारण.रूपाय रूपाऽरूपाय ते सदा।

अप्रमेय.स्वरूपाय शिवाय गुरवे नमः।। 72

दृग्दृश्य.द्रष्टृ.रूपाय निष्पन्न.निजरूपिणे।

अपारायाऽद्वितीयाय शिवाय गुरवे नमः।। 73
गुणाऽऽधाराय गुणिने गुणवर्जित.रूपिणे।
जन्मिने जन्महीनाय शिवाय गुरवे नमः।। 74
अनाद्यायाऽखिलाऽऽद्याय मायिने गतमायिने।
अरूपाय स्वरूपाय शिवाय गुरवे नमः।। 75
सर्वमन्त्र.स्वरूपाय सर्वतन्त्र.स्वरूपिणे।
सर्वगाय समस्ताय शिवाय गुरवे नमः।। 76
मनुष्यचर्मणा बद्ध.स्साक्षात् परशिव.स्स्वयम्।
गुरु.रित्यभिधां गृह्णन् गूढः पर्यटति क्षितौ।। 77
शिवव.द्दृश्यते साक्षा-च्छ्रीगुरुः पुण्यकर्मणाम्।
नरव.द्दृश्यते सैव श्रीगुरुः पापकर्मणाम्।। 78
श्रीनाथ.चरणद्वन्द्वं यस्यां दिशि विराजते।

तस्यै दिशो नमस्कुर्यात् भक्त्या प्रतिदिनं प्रिये।। 79

तस्यै दिशो सतत.मञ्जलि.रेष नित्यं

प्रक्षिप्यते मुखरिताऽलियुत.प्रसूनैः।

जागर्ति यत्र भगवान् गुरुचक्रवर्ती

विश्वस्थिति प्रलय नाटक नित्य साक्षी।। 80

उरसा शिरसा चैव मनसा वचसा दृशा।

पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते।।

गुरोः कृपाप्रसादेन ब्रह्म.विष्णु.महेश्वराः।

समर्था.स्तत् प्रसादो हि केवलं गुरुसेवया।। 82